# Kailasasabhavarnanam 2

# કૈલાસસભાવર્ણનમ્ ૨

## Document Information

Text title : Kailasasabhavarnanam 2

File name : kailAsasabhAvarNanam2.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 33 - sabhAsu nRittavarNanam | 1-30||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# કૈલાસસભાવર્ણનમ્ ૨

(સભાયાં શિવસુદર્શનમ્ ૨)

-। કૈલાસસભાવર્ણનમ્ ૨ શિવરહસ્યાન્તર્ગતમ્ ।-

શ્રીસ્કન્દઃ -

સનાતનસનન્દેન સાનન્દેન મહેશ્વરઃ ।
પાર્વતીહૃદયાનન્દો દેવો યત્ર ચ તાસ્સભાઃ ॥ ૧॥

સદસસ્પતિરીશાનો ગણવૃન્દનિષેવિતઃ ।
મયા દ્વિરદવક્ત્રેણ નન્દિભૃઙ્ગિરિટીશ્વરૈઃ ॥ ૨॥

તણ્ડુહુણ્ડતુહુણ્ડાદ્યૈર્બાણરાવણચણ્ડિકૈઃ ।
દેવ્યાસ્તદગ્રે નટનં સાટોપં કર્તુમુદ્યતઃ ॥ ૩॥

સભાસુ તાસુ સર્વાસુ સભાપતિરુમાપતિઃ ।
સાયં સાયં પ્રદોષેષુ મહાતાણ્ડવપણ્ડિતઃ ॥ ૪॥

અપસ્મારોપરિલસત્પાદપઙ્કજભાસુરઃ ।
ગજેન્દ્રકૃત્તિવસનો જટાચૂડતટિદ્દ્યુતિઃ ॥ ૫॥

જટાકુહર ગર્ભસ્થગઙ્ગાતુઙ્ગતરઙ્ગધૃક્ ।
તત્રૈવોત્ફુલ્લકહ્લારમિત્રાચ્છાદિતમસ્તકઃ ॥ ૬॥

ગરનીલમહાકણ્ઠઃ કુણ્ડલીશ્વરકુણ્ડલઃ ।
સોમધામસમાનાસ્યશ્ચામ્પેયરદનાસિકઃ ॥ ૭॥

નયનત્રિતયોત્ફુલ્લપઙ્કજોત્ફુલ્લમુન્દરઃ ।
ત્રિપુણ્ડ્રરેખાસદ્ભાલો ભસ્માચ્છાદિતવિગ્રહઃ ॥ ૮॥

વામેન પાણિનાલમ્બિનખરક્તાગ્રાલક્તકઃ ।
ધગદ્ધગિતરત્નાચ્છપદકાલમ્બિમાલિકઃ ॥ ૯॥

મહાહીરમણિવ્રાતમુક્તારુદ્રાક્ષમાલિકઃ ।

કાકોદરફણારત્નમાલાકીલિતકન્ધરઃ ॥ ૧૦॥

રત્નગ્રૈવેયલલિતઃ કઙ્કણાસક્તસત્કરઃ ।
ક્વણત્કિઙ્કિણિકાજાલક્ષુદ્રઘણ્ટાલિકાઞ્ચિકઃ ॥ ૧૧॥

પાણિનાન્યેન ડમરું તથાન્યેનોજ્વલપ્રભમ્ ।
સપ્તજિહ્વકૃતોર્ધ્વાઙ્ગ શિખાકાશિતસત્કરઃ ॥ ૧૨॥

ભક્તાભયકરં સાક્ષાદ્રત્નોર્મિકવરાઙ્ગલિઃ ।
કટીતટપટોદ્ભાસિ પુણ્ડરીકાજિનોજ્વલઃ ॥ ૧૩॥

તત્પુચ્છગુચ્છસુભગલમ્બમાનચલદ્યુતિઃ ।
બ્રહ્મમુણ્ડમહાષણ્ડમાલાલલિતકન્ધરઃ ॥ ૧૪॥

નૃત્યજ્ઝણઝણારાવમણિમઞ્જીરરત્નપાત્ ।
સાકુઞ્ચિતેન નૃત્યેન પોષયન્તં જગત્ત્રયમ્ ॥ ૧૫॥

મહારત્નપરિષ્કારિપીઠસંસ્થાં મહેશ્વરીમ્ ।
પશ્યન્દરદલામ્ભોજસન્નિભામલલોચનૈઃ ॥ ૧૬॥

સુધાધામતિરસ્કારિ દેવ્યા વદનપઙ્કજમ્ ।
લીલાલકોદ્યત્તિલકં રત્નતાટઙ્કમણ્ડિતમ્ ॥ ૧૭॥

ઉદ્યત્કવિનિભાત્યચ્છમુક્તાનાસામનોરમમ્ ।
કણ્ઠત્રિવલિગમ્ભીરરત્નગ્રૈવેયભાસુરમ્ ॥ ૧૮॥

લલચ્ચિન્તાકસુભગં કણ્ઠમણ્ડલમીશ્વરઃ ।
ઉત્તુઙ્ગકરિકુમ્ભાભસ્વર્ણકુમ્ભકુચાં શુભામ્ ॥ ૧૯॥

ત્રિવલીલલિતોદારત્રિજગત્સમ્પુટોદરામ્ ।
મૃગેન્દ્રકટિસઙ્કાશરત્નકાઞ્ચિતકાઞ્ચિકામ્ ॥ ૨૦॥

કનકામ્બરજાપારધારાસારજિતામ્બરામ્ ।
ચમ્પકાશોકપુન્નાગસૌગન્ધિકલસત્કચામ્ ॥ ૨૧॥

વેણીમણ્ડલમધ્યસ્થરત્નસીમન્તસુન્દરામ્ ।
અલિકાલમ્બિલાલંહિશોભિસિન્દૂરરેખિકાં ॥ ૨૨॥

ક્વણન્મણિગણાપારકઙ્કણૈર્નાગબન્ધકૈઃ ।
રત્નહસ્તસરાપારચલદ્વલયસત્કરામ્ ॥ ૨૩॥

રત્નાઙ્ગુલીયવિલસદ્વલયાઙ્ગુષ્ઠવેષ્ટિતામ્ ।
મહાહીરૈકફલકકલ્પિતાઙ્ગુષ્ઠવેષ્ટનીમ્ ॥ ૨૪॥

આરક્તારક્તપાદાબ્જરઙ્ગરઞ્જિતપાદુકામ્ ।
પાદાઙ્ગુલીકૃતાપારઝણઝ્ઝણમધુવ્રતામ્ ॥ ૨૫॥

મણિમઞ્જીરજારાવઝણઝ્ઝણિતભૂતલામ્ ।
પાટીરાગરુકસ્તૂરીકર્પૂરાગન્ધમેદુરામ્ ॥ ૨૬॥

પટવાસમહાગન્ધનન્દિતાખિલદિક્તટામ્ ।
સૌન્દર્યધારાસર્વસ્વાકારાં તારાધિપાનનામ્ ॥ ૨૭॥

હલ્લકાક્રાન્તસુકરાં તથાન્યેન વિલમ્બિના ।
પાશાઙ્કુશાભયવરધરાં શ્રીભુવનેશ્વરીમ્ ॥ ૨૮॥

નિર્યત્કટાક્ષાઙ્કુરતઃપશ્યન્તીમાનનં વિભોઃ ।
પશ્યન્ત્સભાસુ તાન્દેવીં સદાનૃત્યતિ શઙ્કરઃ ॥ ૨૯॥

નન્દિભૃઙ્ગિમહાકાલસ્કન્દહેરમ્બસંવૃતઃ ।
રમ્યવાદ્યરવૈસ્સાયં વેદઘોષૈશ્ચ શઙ્કરઃ ॥ ૩૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસસભાવર્ણનમ્ ૨ - સભાયાં શિવસુદર્શનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૩૩ - સભાસુ નૃત્તવર્ણનમ્ । ૧-૩૦॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 33 - sabhAsu nRRittavarNanam . 1-30..

Notes:
Skanda સ્કન્દ gives the description of the beatific Presence of Śiva શિવ with Pārvatī પાર્વતી in the Sabhā સભા (Assembly) at Kailāsa કૈલાસ lorded by Śiva શિવ (the Sabhāpati સભાપતિ), whose Dance Divine in the various constituent sabhā-s સભાસુ (assemblies) is witnessed by Her along with Skanda સ્કન્દ, Heramba હેરમ્બ, Nandi નન્દિ, Bhṛṅgi ભૃઙ્ગિ et al with accompanying music from several instruments.
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Kailasasabhavarnanam 2*

pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*